# .. pramANa lakShaNa (mAdhava) ..

## ॥ प्रमाण लक्षण (माधव) ॥

॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

अशेषगुरुमीशेशं नारायणमनामयम् ।
संप्रणम्य प्रवक्ष्यामि प्रमाणानां स्वलक्षणम् ॥ ॥
यथार्थं प्रमाणम् ।१ ।
तद्द्विविधम् । केवलमनुप्रमाणं च ।२ ।
यथार्थज्ञानं केवलम् ।३ ।
तत्साधनमनुप्रमाणम् ।४ ।
केवलं चतुर्विधम् । ईशलक्ष्मीयोग्योगिभेदेन ।५ ।
पूर्वद्वयमनादिनित्यम् ।६ ।
स्वातंत्रपारतंत्राभ्यां तद्विशेषः । पूर्वं
स्वपरगताखिलविशेष विषयम् । द्वितीयं
ईशेऽन्येभ्योऽधिकम् । ।
असार्वत्रिकम् । अन्यत्र सर्वविषयम् । स्पष्टत्वे भेदः ।७ ।
योगिज्ञानं ऋजूनामनादिनित्यम् । ईशे जीवेभ्योऽधिकम् ।
अन्यत्रालोचने सर्वविशयम् । क्रमेण वर्धमानम् ।
आमुक्तेः । ततोऽव्ययम् । ।
ततोऽर्वाक्क्रमेण ह्रसितम् । सादि च तात्त्विकेभ्योऽन्यत्र ।८ ।
अयोगिज्ञानं उत्पत्तिविनाशवत् । अल्पम् ।९ ।
अनुप्रमाणं त्रिविधम् । प्रतक्षमनुमानमागमं इति ।१० ।
निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् ।
निर्दोषोपपत्तिरनुमानम् । निर्दोषः शब्दः आगमः । ।
अर्थापत्त्युपमे अनुमा विशेषः ।११ ।
अभावोऽनुमाप्रत्यक्षं च ।१२ ।
परामर्शापरामर्शविशेषात् ।१३ ।
संभवपरिशेषानुमा ।१४ ।
आत्मान्योन्याश्रय चक्रकानवस्थाकल्पनागौरव
श्रुतदृष्टहानादयोदूषणानुमा । ।
उपक्रमोपसंहार तदैकरूपाभ्यासापूर्वताफलार्थवादाश्च ।१५ ।
उपपत्तिविशेषाः ।१६ ।
त एव सोपपत्तयो लिङ्गानि ।१७ ।
समाख्या वाक्यप्रकरणस्थानानि च । लिङ्गविशेषाः ।१८ ।
व्याप्तिरुपपपत्तिमूलम् ।१९ ।



DR.RUPAK NATH (DR.RUPAK NAT

सा प्रतिज्ञाहेतुदृष्टांतरूपा ।२० ।
हेतुगर्भा प्रतिज्ञा केवलाऽपि ।२१ ।
सिद्धौ प्रतिज्ञायां हेतुमात्रं च ।२२ ।
दृष्टांतः स प्रतिज्ञो हेतुगर्भः ।२३ ।
उपपत्तिदोषौ विरोधासङ्गति ।२४ ।
न्यूनाधिके वाचनिके ।२५ ।
संवादानुक्तियुतास्तु एव निग्रहाः ।२६ ।
प्रत्यक्षं सप्तविधम् । साक्षि षडिन्द्रियभेदेन ।२७ ।
मानस प्रत्यक्षजा स्मृतिः ।२८ ।
स्मृत्यनुवादयोर्नाप्रामाण्यम् ।२९ ।
यथार्थत्वानुभवात् ।३० ।
अहानेश्च ।३१ ।
विरोधो मानस्ववाक्याभ्याम् ।३२ ।
स्ववाक्यविरोधोऽपसिद्धांतजातिरूपेण ।३३ ।
जातिर्न मेये मानापेक्षेत्यादिका ।३४ ।
मेये मानापेक्षास्तीति च तेनैव न्यायेन सिद्धत्वात् ।३५ ।
मानविरोधश्च ।३६ ।
छलमसङ्गति ।३७ ।
अन्यच्च ।३८ ।
अन्यच्च ।३९ ।
गृष्टिविवक्षया गामानयेत्युक्ते पृथिवी विवक्षया
गवानयनमशक्यमितिवत् । ।
त्रिविधो विरोधः । प्रतिज्ञाहेतुदृष्टांतभेदेन ।४० ।
प्रमाणविरुद्धार्थप्रतिज्ञा प्रतिज्ञाविरोधः ।४१ ।
हेतुस्वरूपासिद्धिरव्याप्तिश्चेति हेतुविरोधः ।४२ ।
साध्यस्य साधनस्य वाऽननुगमो दृष्टांत विरोधः ।४३ ।
प्रतिज्ञायाः समबलविरोध एव सप्रतिसाधनः ।४४ ।
स एवोपाधि दोषोऽपि ।४५ ।
सर्व एते दृश्यत्वानुमाने दृष्टव्याः ।४६ ।
प्रत्यक्षागमादिभिर्जगतः सत्यत्वात् ।४७ ।
तत्पक्षे दृश्यत्वस्य च मिथ्यात्वात् ।४८ ।
अनिर्वचनीयस्य प्रतिवादिनोऽसिद्धत्वात् ।४९ ।
अनिर्वचनीयस्येति ।५० ।
आत्मनोऽपि दृश्यत्वात् ।५१ ।
शुक्तिरजतादेरनिर्वचनीयत्वाभावात् ।५२ ।
अनिर्वचनीय दृश्यत्वाभावात् ।५३ ।



RUPNATHJI( DR. RUPAK NATH )

मानसिद्धत्वादिति सप्रतिसाधनत्वात् ।५४ ।
जगत्सत्यत्वग्राहि प्रत्यक्षस्य वर्तमानमात्रग्राहित्वे
अनुमानागमप्रामाण्य ग्राहिणोऽपि प्रत्यक्षत्वाविशेषादुत्तरक्षणे
प्रामाण्यं न सेत्स्यतीति भेदादिवाक्यानामेव प्रामाण्यं स्यात् । ।
तस्य साक्षिसिद्धत्वं चेज्जगत्सत्यत्वमपि साक्षिसिद्धम् ।५५ ।
व्यभिचारिश्चेदागमार्थानुमानिर्दोषत्वाध्यवसाये च समः ।५६ ।
अत उत्तरदिवसेऽभेदवाक्यस्य भेदोऽर्थः स्यात् ।५७ ।
निर्दोषानुमायाः सदोषत्वम् ।५८ ।
सदोषानुमायाः निर्दोषत्वम् ।५९ ।
इत्यव्यवस्था ।६० ।
आश्रयसाध्यवधिकरणासिद्धयो न दूषणम् ।६१ ।
अतिप्रसङ्गाभावात् ।६२ ।
अतिप्रसङ्गेन हि दोषत्वादोषत्वे कल्प्ये ।६३ ।
व्याप्तिरेव हि प्रयोजिका ।६४ ।
असत्यपि व्याप्तिरस्त्येव ।६५ ।
असदाश्रयस्य साधकत्वं नेत्यपि व्याप्तिं विना
कथं निवार्यते । ।
असदाश्रयमित्यादि विशेषणत्वसंभवे कथमव्याप्तिः ।६६ ।
न चात्यंताभावोऽपि सर्वधर्मरहितः । प्रमेयत्वाद्यनुभवात् ।६७ ।
परिशेषार्थापत्तिप्रामाण्याभ्युपगमाच्च ।६८ ।
विमतं सकर्तृकमित्यत्र सर्वज्ञत्वस्य पक्षधर्मता बलेन
सिद्धयङ्गीकारात् । ।
परिशेषोऽर्थापत्तिरनुमानमित्यविशेषः । उपपत्तिमात्रत्वात् ।६९ ।
उपपत्तेश्च व्याप्त्यपेक्षा सर्वथाङ्गीकार्येत्याग्रह मात्रेण भेदः ।७० ।
उपमानस्यापि व्याप्तिरूपत्वात् ।७१ ।
न हि स्वसदृशेनासदृशं क्वचिद्दृष्टम् ।७२ ।
योग्यानुपलब्धेश्च लिङ्गत्वम् ।७३ ।
अविशेषात् ।७४ ।
अविशेषात् ।७५ ।
अविशेषात् ।७६ ।
अविशेषात् ।७७ ।
उक्तदोषेष्वेवाशेषानुमानदोषाणामंतर्भावः ।७८ ।
साध्याविशिष्टोऽसिद्धिः ।७९ ।
सिद्धसाधकोऽसङ्गतिः ।८० ।
न प्रमासाधनं प्रमाणम् ।८१ ।
ज्ञानव्यतिरिक्तप्रमायां प्रमाणाभावात् ।८२ ।



DR.RUPAK NATH (DR.RUPNATHJI)

न चाज्ञातपरिच्छित्तिरेव प्रमेत्यत्र किञ्चिन्मानम् ।८३ ।
याथार्थ्यमेव प्रामाण्यमित्यङ्गीकारात् ।८४ ।
न चानुभूतिरेव प्रमाणम् । स्मृत्यादावव्याप्तेः ।८५ ।
वेदानुमानादि प्रामाण्यप्रसिद्धेश्च ।८६ ।
स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् ।
प्रमाणमिति विज्ञेयं धर्माद्यर्थे बुभूषुभिः ॥

इति श्रुतेश्च । ।

ऐतिह्यमागमभेदः ।८७ ।
न च सम्यगनुभवसाधनं प्रमाणम् । ईश्वरज्ञानादावव्यप्तेः ।८८ ।
अप्रामाण्ये प्रमाणाभावच्च ।८९ ।
प्रामाण्यज्ञाने च ।९० ।
तत्राप्यङ्गीकारेऽनवस्थितेः ।९१ ।
स्वप्रकाशात्माङ्गीकारे तत्राव्याप्तेः ।९२ ।
स्मृतेश्च प्रामाण्यानङ्गीकारेऽनुभूतं मयेत्यत्र प्रमाणाभावात् ।९३ ।
लिङ्गत्वेन प्रामाण्ये कल्पनागौरवम् ।९४ ।
दृष्टहानिश्च ।९५ ।
स्मृतिप्रमाणद्वैविध्यमात्रकल्पने मिथ्याज्ञानादेर्निरासादनुभव
विरोधः । ।
तदनुभवाभाव इत्युक्तेऽनुभवः स्मृतिश्च नास्तीत्युक्ते
किमुत्तरम् । ।
स्वसिद्धैः साधनं परसिद्धैर्दूषणम् ।९६ ।
अतो न दूषणे अपसिद्धांतादि ।९७ ।
इष्टापत्तिः सिद्धसाधनत्वादसङ्गतमेव ।९८ ।
आनंदतीर्थमुनिना ब्रह्मतर्कोक्तमार्गतः ।
मानलक्षणमित्युक्तं सङ्क्षेपाद्ब्रह्मसिद्धये ॥ ॥
अशेषमानमेयैक साक्षिणेऽक्षयमूर्तये ।
अजेश पुरुहूतेड्य नमो नारायणाय ते ॥ ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितं
प्रमाणलक्षनग्रन्थोत्तमं संपूर्णम्
॥ भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु ॥

RUPNATHJI ( DR.RUPAK NAT